# खण्ड 6 - मंगलम्
## स्तोत्रम्

## 88. श्री गणेश स्तोत्रम्

अजं निर्विकल्पं निराकारमेकं
निरानन्दमानन्दमद्वैतपूर्णम्
परं निर्गुणं निर्विशेषं निरीहं
परब्रह्मरूपं गणेशं भजेम ।।१।।

गुणातीतमानं चिदानन्दरूपं
चिदाभासकं सर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशं
परब्रह्मरूपं गणेशं भजेम ।।२।।

जगत्कारणं कारणज्ञानरूपं
सुरादिं सुखादिं गुणेशं गणेशम् ।
जगद्व्यापिनं विश्ववन्द्यं सुरेशं
परब्रह्मरूपं गणेशं भजेम ।।३।।

* * *

## 89. नित्य पारायण स्तोत्रम्

### प्रातः उठकर अपने करों को देखकर...

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थिता गौरी प्रभाते करदर्शनम् ।।

### निद्रा से उठकर धरती पर पांव रखते समय...

समुद्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ।।

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मंगलं कुरु ।।
रत्नाकरधौतपदां हिमालयकिरीटिनीम् ।
ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम् ।।

### स्नान करते समय...

गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेस्मिन् सन्निधिं कुरु ।।

### प्रदक्षिणा करते समय...

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ।।

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष मां जगदीश्वर ।।

## प्रार्थना...

श्रद्धां मेधां यशः प्रज्ञाम् विद्यां बुद्धिं श्रियं बलम् ।
आयुष्यं तेज आरोग्यं देहि मे पुरुषोत्तम ।।

## अन्न लेते समय...

अन्नपूर्णे सदापूर्णे शंकरप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ।।
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।।

## दीप जलाते समय...

दीपमूले स्थितो ब्रह्मा दीपमध्ये जनार्दनः ।
दीपाग्रे शंकरः प्रोक्तः संध्यादीप नमोऽस्तु ते ।।

शुभं करोति कल्याणं आरोग्यं धनसम्पदः ।
शत्रु बुद्धि विनाशाय दीपज्योति नमोऽस्तु ते ।।

दीपो ज्योतिः परं ब्रह्मा दीपो ज्योति जनार्दनः ।
दीपो हरतु मे पापं सन्ध्या दीपो नमोऽस्तु ते ।।

## क्षमा प्रार्थना...

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृते स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ।।

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो ।
न चाह्वानम् ध्यानम् तदपि च न जाने स्तुतिकथाः ।।

न जाने मुद्रास्ते तदपि च न जाने विलपनम् ।
परम् जाने मातः त्वदनुसरणं क्लेशहरणम् ।।

## निद्रा से पहले...

रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् ।
शयने यः स्मरेन्नित्यं दुःखस्वप्नस्तस्य नश्यति ।।

* * *

## 90. दक्षिणामूर्ति स्तोत्रम्

*ध्यानं*

मौनव्याख्याप्रकटितपरब्रह्मतत्वं युवानं
वर्षिष्ठान्ते वसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दरूपं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥१॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥२॥

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तुच्छिन्नसंशयाः ॥३॥

निधये सर्वविद्यानां भिषजे भवरोगिणाम् ।
गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥४॥

ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥५॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवाण्याप्त देहाय दक्षिणामूर्तये नमः ॥६॥

* * *

# 91. देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ।।१।।

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।२।।

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।३।।

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।४।।

परित्यक्ता देवा विविधविधिसेवाकुलतया

मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ।।५।।

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ।।६।।

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ।।७।।

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ।।८।।

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ।।९।।

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब विचित्रमत्र किं परिपूर्ण करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥१२॥

इति श्रीमच्छङ्कराचार्यकृतं देव्यपराधक्षमापनस्तोत्रम् ।

* * *

# 92. शारदा स्तोत्रम्

नमस्ते शारदे देवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे ।।१।।

या श्रद्धा धारणा मेधा वाग्देवी विधिवल्लभा ।
भक्तजिह्वाग्रसदना शमादिगुणदायिनी ।।२।।

नमामि यामिनीं नाथलेखालङ्कृत कुन्तलाम् ।
भवानीं भवसन्तापनिर्वापणसुधानदीम् ।।३।।

भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य एव च ।।४।।

ब्रह्मस्वरूपा परमा ज्योतिरूपा सनातनी ।
सर्वविद्याधिदेवी या तस्यै वाण्यै नमो नमः ।।५।।

यया विना जगत्सर्वं शश्वज्जीवन्मृतं भवेत् ।
ज्ञानाधिदेवी या तस्यै सरस्वत्यै नमो नमः ।।६।।

यया विना जगत्सर्वं मूकमुन्मत्तवत्सदा ।
या देवी वागधिष्ठात्री तस्यै वाण्यै नमो नमः ।।७।।

* * *

## 93. शिव पञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय
तस्मै नकाराय नमः शिवाय ॥ १ ॥

मन्दाकिनीसलिलचन्दनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय
तस्मै मकाराय नमः शिवाय ॥ २ ॥

शिवाय गौरीवदनाब्जवृन्द-
सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै शिकाराय नमः शिवाय ॥ ३ ॥

वसिष्ठकुम्भोद्भवगौतमार्य-
मुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय
तस्मै वकाराय नमः शिवाय ॥ ४ ॥

यक्षस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय
तस्मै यकाराय नमः शिवाय ॥ ५ ॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ६ ॥

* * *

# 94. शिवताण्डवस्तोत्रम्

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम् ।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥१॥

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्द्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥२॥

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर-
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥३॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥४॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर-
प्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥५॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा-
निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।
सुधामयूखलेखया विराजमानशेखरं
महाकपालि सम्पदे शिरो जटालमस्तु नः ॥६॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके ।
धरोधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥७॥

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुर-
त्कुहूनिशीथिनीतमःप्रबन्धबद्धकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥८॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा-
वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥९॥

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी-
रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥१०॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस-
द्विनिर्गमत्क्रमस्फुरत्करालभालहव्यवाट् ।

धिमिद्धिमिद्धिमिद्ध्वनन्मृदङ्गतुङ्गमङ्गल-
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥११॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो-
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ॥१२॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन् ।
विलोललोललोचनो ललामभाललग्नकः
शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥१३॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम् ॥१४॥

पूजावसानसमये दशवक्त्रगीतं
यः शम्भुपूजनपरं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥१५॥

इति श्रीरावणकृतं शिवताण्डवस्तोत्रं सम्पूर्णम् ।

* * *

# 95. श्री अन्नपूर्णा स्तोत्रम्

नित्यानन्दकरी वरायभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपापनिकरी प्रत्यक्षमाहेश्वरी
प्रालेयाचलवंशपावनकरी काशीपूराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।१।।

नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोज कुम्भान्तरी ।
काश्मीरागरुवासिता रुचिकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।२।।

योगानन्दकरी रिपुक्षयकरी धर्मैक्यनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यकरी तपःफलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।३।।

कैलासाचलकन्दरालयकरी गौरी ह्युमा शाङ्करी
कौमारी निगमार्थगोचरकरी ह्योंकारबीजाक्षरी ।
मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।४।।

दृश्यादृश्यविभूतिवाहनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रखेलनकरी विज्ञानदीपाङ्कुरी ।

श्रीविश्वेशमनः प्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥५॥

उर्वीसर्वजनेश्वरी जयकरी माता कृपासागरी
वेणीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी ।
साक्षान्मोक्षकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥६॥

आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी
काश्मीरा त्रिपुरेश्वरी त्रिनयनी विश्वेश्वरी शर्वरी ।
स्वर्गद्वारकपाटपाटकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥७॥

देवी सर्वविचित्ररत्नरचिता दाक्षयिणी सुन्दरी
वामस्वादुपयोधरा प्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥८॥

चन्द्रार्कानलकोटिकोटिसदृशी चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमाननकुन्तलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशसांकुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥९॥

क्षत्रत्राणकरी महाभयकरी माता कृपासागरी
सर्वानन्दकरी सदा शिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥१०॥

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वती ॥११॥
माता च पार्वती देवी पिता देवो महेश्वरः ।

बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥१२॥

* * *

# 96. श्री अष्टलक्ष्मी स्तोत्रम्

## आदिलक्ष्मी

सुमनसवंदित सुंदरी माधवी चंद्र सहोदरी हेममये ।
मुनिगण वंदित मोक्ष प्रदायिनी मंजुळभाषिणी वेदनुते ।।
पंकज वासिनी देवसुतपूजित सद्गुणवर्षिणि शांतियुते
जय जय हे ! मधुसूदन कामिनी आदिलक्ष्मी सदा
पालय माम् ।।१।।

## श्री धान्य लक्ष्मी

अयिकली कल्मषनाशिनी कामिनी वैदिक रूपिणी वेदमये ।
क्षीर समुद्भव मंगळ रूपिणी मंत्र निवासिनी मंत्रनुते ।।
मंगळदायिनी अंबुजवासिनी देवगणाश्रित पादयुते ।
जय जय हे ! मधुसूदन कामिनी धान्य लक्ष्मी सदा
पालय माम् ।।२।।

## श्री धैर्य लक्ष्मी

जयवरवर्णिनी वैष्णवी भार्गवि मंत्र स्वरूपिणी मंत्रमये ।
सुरगण पूजित शीघ्रफलप्रद ज्ञानविकासिनी शास्त्रनुते ।।
भवभयहारिणी पाप विमोचिनी साधु जनाश्रित पादयुते ।
जय जय हे ! मधुसूदन कामिनी धैर्य लक्ष्मी सदा
पालय माम् ।।३।।

## श्री गज लक्ष्मी

जय जय दुर्गति नाशिनी कामिनी सर्व फलप्रद शास्त्रमये ।
रथ गज तुरगपदाती समावृत परिजन मंडित लोकनुते ।
हरिहर ब्रह्म सुपूजित सेवित तापनिवारिणी पादयुते ।
जय जय हे ! मधुसूदन कामिनी गज लक्ष्मी रूपेण सदा
पालय माम् ॥४॥

## श्री संतान लक्ष्मी

अयिखगवाहिनी मोहिनी चक्रिणी रागविवर्धिनी ज्ञानमये ।
गुणगण वारिधि लोकहितैषिणि स्वर सप्तभूषित गाननुते ॥
सकल सरासुर देव मुनीश्वर मानव वंदित पादयुते ।
जय जय हे ! मधुसूदन कामिनी संतान लक्ष्मी सदा
पालय माम् ॥५॥

## श्री विजयलक्ष्मी

जय कमलासिनी सद्गुणदायिनी ज्ञान विकासिनी ज्ञानमये ।
अनुदिनमर्चित कंकुमधूसर भूषित वासित वाद्यनुते ॥
कनकधारास्तुति वैभव वंदित शंकर देशिक मान्यपदे ।
जय जय हे ! मधुसूदन कामिनी विजयलक्ष्मी सदा
पालय माम् ॥६॥

## श्री विद्या लक्ष्मी

प्रणत सुरेश्वरी ! भारती भार्गवी शोकविनाशिनी रत्नमये ।
मणिमय भूषित कर्णविभूषण शांति समावृत हास्यमुखे ।
नवनिधि दायिनी कलिमलहारिणि कामित फलप्रद हस्तयुते ।
जय जय हे ! मधुसूदन कामिनी विद्यालक्ष्मी सदा
पालय माम् ॥७॥

## श्री धन लक्ष्मी

धिमी धिमी धिंदिमी धिंदिमी दुंदुभि नाद संपूर्णमये
घम घम घुंघुम घुंघुम घुंघम शंख निनाद सुवाद्यदनुते ॥
वेद पुराणेतिहास सुपूजित वैदिकमार्ग प्रदर्शयुते ।
जय जय हे ! मधुसूदन कामिनी धन लक्ष्मी रूपेण सदा
पालय माम् ॥८॥

## फल श्रुति

अष्टलक्ष्मी नमस्तुभ्यं वरदे कामरूपिणि ।
विष्णुवक्षः स्थला रूढ़े भक्त मोक्ष प्रदायिनि ॥
शङ्ख चक्र गदाहस्ते विश्वरूपिणि ते जयः
जगन्मात्रे च मोहिन्यै मङ्गलं शुभ मङ्गलं ॥

* * *

# 97. श्री गङ्गास्तोत्रम्

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे ।
शङ्करमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ।। १ ।।

भागीरथिसुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ।। २ ।।

हरिपदपाद्यतरङ्गिणि गङ्गे हिमविधुमुक्ताधवलतरङ्गे ।
दूरीकुरु मम दुष्कृतिभारं कुरु कृपया भवसागरपारम् ।। ३ ।।

तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम् ।
मातर्गङ्गे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ।। ४ ।।

पतितोद्धारिणि जाह्नवि गङ्गे खण्डितगिरिवरमण्डित भङ्गे ।
भीष्मजननि हे मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ।। ५ ।।

कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके ।
पारावारविहारिणि गङ्गे विमुखयुवतिकृततरलापाङ्गे ।। ६ ।।

नव चेन्मातः स्त्रोतः स्नातः पुनरपि जठरे सोऽपि न जातः ।
नरकनिवारिणि जाह्नवि गङ्गे कलुषविनाशिनि महिमोत्तुंङ्गे ।। ७ ।।

पुनरसदङ्गे पुण्यतरङ्गे जय जय जाह्नवि करुणापाङ्गे ।
इन्द्रमुकुटमणिराजितचरणे सुखदे शुभदे भृत्यशरण्ये ।। ८ ।।

रोगं शोकं तापं पापं हर मे भगवति कुमतिकलापम् ।
त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ॥ ९ ॥

अलकानन्दे परमानन्दे करुणामयि कातरवन्द्ये ।
तव तटनिकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ॥ १० ॥

वरमिह नीरे कमठो मीनः किं वा तीरे शरटः क्षीणः ।
अथवाश्वपचो मलिनो दीनस्तव नहि दूरे नृपतिकुलीनः ॥ ११ ॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।
गङ्गास्तवमिममलंनित्यं पठति नरोयः स जयति सत्यम् ॥ १२ ॥

येषां हृदये गङ्गाभक्तिस्तेषां भवति सदा सुखमुक्तिः ।
मधुराकान्ता पज्झटिकाभिः परमानन्दकलितललिताभिः ॥ १३ ॥

गङ्गास्तोत्रमिदं भवसारं वाञ्छितफलदं विमलं सारम् ।
शङ्करसेवकशङ्कररचितं पठति सुखी स्तव इति च समाप्तः ॥ १४ ॥

इति श्रीमच्छङ्कराचार्यविरचितं गङ्गास्तोत्रं सम्पूर्णम् ।

* * *

# 98. श्रीगुरुस्तोत्रम्

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥१॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥३॥

स्थावरं जङ्गमं व्याप्तं यत्किञ्चित् सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥४॥

चिन्मयं व्यापि यत्सर्वं त्रैलोक्यं सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥५॥

सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः
वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः ॥६॥

चैतन्यः शाश्वतः शान्तो व्योमातीतो निरञ्जनः ।
बिन्दुनादकलातीतस्तस्मै श्रीगुरवे नमः ॥७॥

ज्ञानशक्तिसमारूढः तत्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥८॥

अनेकजन्मसम्प्राप्तकर्मबन्धविदाहिने ।
आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥९॥

शोषणं भवसिन्धोश्च ज्ञापनं सारसम्पदः ।
गुरोः पादोदकं सम्यक् तस्मै श्रीगुरवे नमः॥१०॥

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वज्ञानात् परं नास्ति तस्मै श्रीगुरवे नमः ॥११॥

मन्नाथः श्रीजगन्नाथः मद्गुरुः श्रीजगद्गुरुः ।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥१२॥

गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥१३॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥१४॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्व मम देवदेव ॥१५॥

* * *

## 99. श्रीमहिषासुरमर्दिनी स्तोत्रम्

अयि गिरिनन्दिनी नन्दितमेदिनी विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्यशिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुंबिनि भूरिकुटुंबिनि भूरिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। १ ।।

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शंकरतोषिणि किल्बिषमोषिणि घोषरते ।
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिंधुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। २ ।।

अयि जगदम्ब मदम्ब कदम्बवनप्रियवासिनि हासरते
शिखरिशिरोमणितुंगहिमालयश्रृंगनिजालय मध्यगते ।
मधुमधुरे मधुकैटभगंजिनि कैटभभंजिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। ३ ।।

अयि शतखण्ड विखण्डितरुण्ड वितुण्डितशुण्ड गजाधिपते
रिपुगजगण्ड विदारणचण्ड पराक्रमशुण्ड मृगाधिपते ।
निजभुजदण्ड निपातितखण्डविपातितमुण्डभटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। ४ ।।

अयि रणदुर्मद शत्रुवधोदित दुर्धरनिर्जर शक्तिभृते
चतुरविचार धुरीणमहाशिव दूतकृत प्रमथाधिपते ।
दुरितदुरीह दुराशयदुर्मति दानवदूतकृतान्तमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। ५ ।।

अयि शरणागतवैरिवधूवर वीरवराभयदायकरे
त्रिभुवन मस्तक शूलविरोधि शिरोधिकृतामल शूलकरे ।
दुमिदुमितामर दुंदुभिनाद महो मुखरीकृत तिग्मकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। ६ ।।

अयि निजहुंकृतिमात्र निराकृत धूम्रविलोचन धूम्रशते
समरविशोषित शोणितबीज समुद्भवशोणित बीजलते ।
शिव शिव शुम्भ निशुम्भमहाहव तर्पित भूत पिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। ७ ।।

धनुरनुसंग रणक्षणसंग परिस्फुरदंग नटत्कटके
कनक पिशंगपृषत्कनिषङ्गरसद्भटश्रृंग हतावटुके ।
कृतचतुरंग बलक्षितिरंग घटद्बहुरंग रटद्बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। ७ ।।

जय जय जप्यजये जय शब्दपरस्तुति तत्पर विश्वनुते
भण भणभिंजिमि भिंकृतनूपुर सिंजितमोहित भूतपते ।
नटितनटार्ध नटीनटनायक नाटितनाट्य सुगानरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। ९ ।।

अयि सुमनः सुमनः सुमनः सुमनोहर कान्तियुते
श्रितरजनी रजनी रजनी रजनी रजनीकर वक्त्रवृते ।
सुनयनविभ्रमर भ्रमर भ्रमर भ्रमर भ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १० ॥

सहितमहाहव मल्लमतल्लिक मल्लितरल्लक मल्लरते
विरचितवल्लिक पल्लिकमल्लिक भिल्लिकभिल्लिक वर्गवृते ।
सितकृतपुल्लि समुल्लीसतारुणतल्लजपल्लव सल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ११ ॥

अविरलगण्डगलन्मदमेदुर मत्तमतंगज राजपते
त्रिभुवनभूषणभूतकलानिधि रूपपयोनिधि राजसुते ।
अयि सुदतीजन लालसमानस मोहनमन्मथ राजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १२ ॥

कमलदलामल कोमलकान्ति कलाकलितामल भाललते ।
सकलविलास कलानिलयक्रम केलिचलत्कल हंसकुले ।
अलिकुल संकुल कुवलय मण्डल मौलिमिलद्भकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १३ ॥

करमुरलीरववीजितकूजित लज्जितकोकिल मंजुमते-
मिलितपुलिंद मनोहरगुंजित रंजितशैल निकुंजगते ।

निजगुणभूत महाशबरीगण सद्गुणसंभृत केलितले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। १४ ।।

कटितटपीत दुकूलविचित्र मयूखतिरस्कृत चंद्ररुचे
प्रणतसुरासुर मौलिमणिस्फुरदंशुलसन्नख चंद्ररुचे ।
जितकनकाचल मौलिपदोर्जित निर्भरकुंजर कुंभकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। १५ ।।

विजित सहस्रकरैक सहस्रकरैक सहस्रकरैकनुते
कृतसुरतारक संगरतारक संगरतारक सूनुनुते ।
सुरथसमाधि समानसमाधि समाधिसमाधि सुजातरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। १६ ।।

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं स शिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तव पदमेव परंपदमित्यनुशीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। १७ ।।

कनकलसत्कल सिन्धुजलैरनु सिंचिनुतेगुण रंगभुवं
भजति स किं न शचीकुचकुंभ तटीपरिरंभ सुखानुभवम् ।
तवचरणं शरणं करवाणि नतामरवाणि निवासि शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। १८ ।।

तव विमलेन्दुकुलं वदनेन्दुमलं सकलं ननु कूलयते ।
किमु पुरुहूतपुरीन्दुमुखी सुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवनामधने भवती कृपया किमुत क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १९ ॥

अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननी कृपयासि यथासि तथाऽनुभितासिरते ।
यदुचितमत्र भवत्युररी कुरुतादुरुतापमपाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २० ॥

* * *

## 100. श्रीरामस्तोत्रम्

आपदामपहर्तारं दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ।। १ ।।

आर्तानामार्तिहन्तारं भीतानां भीतिनाशनम् ।
द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ।। २ ।।

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्माग्रतो नित्यं रामः पातु सलक्ष्मणः ।। ३ ।।

नमः कोदण्डहस्ताय सन्धीकृतशराय च ।
खण्डिताखिलदैत्याय रामायापन्निवारिणे ।। ४ ।।

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ।। ५ ।।

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ।। ६ ।।

* * *

# 101. श्रीनृसिंहकवचस्तोत्रम्

नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा ।
सर्वरक्षाकरं पुण्यं सर्वोपद्रवनाशनम् ।। १ ।।

सर्व सम्पत्करं चैव स्वर्गमोक्षप्रदायकम् ।
ध्यात्वा नृसिंहं देवेशं हेमसिंहासनस्थितम् ।। २ ।।

विवृतास्यं त्रिनयनं शरदेन्दुसमप्रभम् ।
लक्ष्म्यालिङ्गितवामाङ्गम् विभूतिभिरुपाश्रितम् ।। ३ ।।

चतुर्भुजं कोमलाङ्गं स्वर्णकुण्डलशोभितम् ।
सरोजशोभितोरस्कं रत्नकेयूरमुद्रितम् ।। ४ ।।

तप्त काञ्चनसंकाशं पीतनिर्मलवाससम् ।
इन्द्रादिसुरमौलिष्ठः स्फुरन्माणिक्यदीप्तिभिः ।। ५ ।।

विराजितपदद्वन्द्वम् च शङ्खचक्रादिहेतिभिः ।
गरुत्मता च विनयात् स्तूयमानम् मुदान्वितम् ।। ६ ।।

स्व हृत्कमलसंवासं कृत्वा तु कवचं पठेत् ।
नृसिंहो मे शिरः पातु लोकरक्षार्थसम्भवः ।। ७ ।।

सर्वगोऽपि स्तम्भवासः भालं मे रक्षतु ध्वनिम् ।
नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः ।। ८ ।।

स्मृतिं मे पातु नृहरिः मुनिवर्यस्तुतिप्रियः ।
नासाम् मे सिंहनाशस्तु मुखं लक्ष्मीमुखप्रियः ।। ९ ।।

सर्व विद्याधिपः पातु नृसिंहो रसनां मम ।
वक्त्रं पात्विन्दुवदनः सदा प्रह्लादवन्दितः ।। १० ।।

नृसिंहः पातु मे कण्ठं स्कन्धौ भूभृरणान्तकृत् ।
दिव्यास्त्रशोभितभुजौ नृसिंहः पातु मे भुजौ ।। ११ ।।

करौ मे देववरदो नृसिंहः पातु सर्वतः ।
हृदयं योगि साध्यश्च निवासं पातु मे हरिः ।। १२ ।।

मध्यं पातु हिरण्याक्ष वक्षःकुक्षिविदारणः ।
नाभिं मे पातु नृहरिः स्वनाभिब्रह्मसंस्तुतः ।। १३ ।।

ब्रह्माण्ड कोटयः कट्यां यस्यासौ पातु मे कटिम् ।
गुह्यं मे पातु गुह्यानां मन्त्राणां गुह्यरूपदृक् ।। १४ ।।

ऊरू मनोभवः पातु जानुनी नररूपदृक् ।
जङ्घे पातु धराभार हर्ता योऽसौ नृकेसरी ।। १४ ।।

सुर राज्यप्रदः पातु पादौ मे नृहरीश्वरः ।
सहस्रशीर्षापुरुषः पातु मे सर्वशस्तनुम् ।। १६ ।।

महोग्रः पूर्वतः पातु महावीराग्रजोऽग्नितः ।
महाविष्णुर्दक्षिणे तु महाज्वालस्तु नैरृतः ।। १७ ।।

पश्चिमे पातु सर्वेशो दिशि मे सर्वतो मुखः ।
नृसिंहः पातु वायव्यां सौम्यां भीषणविग्रहः ।। १८ ।।

ईशान्यां पातु भद्रो मे सर्वमङ्गलदायकः ।
संसारभयतः पातु मृत्योर्मृत्युर्नृकेसरी ।। १९ ।।

इदं नृसिंहकवचं प्रह्लादमुखमण्डितम् ।
भक्तिमान् यः पठेन्नित्यं सर्वपापैः प्रमुच्यते ।। २० ।।

पुत्रवान् धनवान् लोके दीर्घायुरुपजायते ।
यं यं कामयते कामं तं तं प्रप्नोत्यसंशयम् ।। २१ ।।

सर्वत्र जयमाप्नोनि सर्वत्र विजयी भवेत् ।
भूम्यन्तरिक्षदिव्यानां ग्रहाणां विनिवारणम् ।। २२ ।।

वृश्चिकोरगसम्भूत विषापहरणं परम् ।
ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणम् ।। २३ ।।

भुजैवा तालपात्रे वा कवचं लिखितं शुभम् ।
करमूले धृतं येन सिध्येयुः कर्मसिद्धयः ।। २४ ।।

देवासुर मनुष्येषु स्वं स्वमेव जयं लभेत् ।
एकसन्ध्यं त्रिसन्ध्यं वा यः पठेन्नियतो नरः ।। २५ ।।

सर्व मङ्गलमाङ्गल्यं भुक्तिं मुक्तिं च विन्दति ।
द्वात्रिंशतिसहस्राणि पठेत् शुद्धात्मनां नृणाम् ।। २६ ।।

कवचस्यास्य मन्त्रस्य मन्त्रसिद्धिः प्रजायते ।
अनेन मन्त्रराजेन कृत्वा भस्माभिर्मन्त्रणाम् ।। २७ ।।

तिलकं विन्यसेद्यस्तु तस्य ग्रहभयं हरेत् ।
त्रिवारं जपमानस्तु दत्तं वार्यभिमन्त्र्य च ।। २८ ।।

प्रासयेद् यो नरो मन्त्रं नृसिंहध्यानमाचरेत् ।
तस्य रोगः प्रणश्यन्ति ये च स्युः कुक्षिसं भवाः ।। २९ ।।

किमत्र बहुनोक्तेन नृसिंहसदृशोभवेत्
मनसा चिंतितं यत्तु तत्वाप्नोत्यसंशयम् ।
गर्जन्तं गार्जयन्तं निजभुजपटलं स्फोटयन्तं हतन्तं
रूप्यन्तं तापयन्तं दिवि भुवि दितिजं क्षेपयन्तं क्षिपन्तम् ।
क्रन्दन्तं रोषयन्तं दिशि दिशि सततं संहरन्तं भरन्तं
वीक्षन्तं घूर्णयन्तं करनिकरशतैर्दिव्यसिंहं नमामि ।। ३० ।।

।। इति श्रीब्रह्माण्डपुराणे प्रह्लादोक्तं श्रीनृसिंहकवचं सम्पूर्णम् ।।

* * *

# 102. श्री सरस्वती स्तोत्रम्

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।।१।।

आशासु राशीभवदङ्गवल्ली-
भासैव दासीकृतदुग्धसिन्धुम् ।
मन्दस्मितैर्निन्दितशारदेन्दुं
वन्देऽरविन्दासनसुन्दरि त्वाम् ।।२।।

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ।।३।।
सरस्वतीं च तां नौमि वागधिष्ठातृदेवताम् ।
देवत्वं प्रतिपद्यन्ते यदनुग्रहतो जनाः ।।४।।

पातु नो निकषग्रावा मतिहेम्नः सरस्वती ।
प्राज्ञेतरपरिच्छेदं वचसैव करोति या ।।५।।

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां च दधतीं पद्मासन संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ।।६।।

वीणाधरे विपुलमङ्गलदानशीले
    भक्तार्तिनाशिनि विरञ्चिहरीशवन्द्ये ।
कीर्तिप्रदेऽखिलमनोरथदे महार्हे
    विद्याप्रदायिनि सरस्वति नौमि नित्यम् ॥७॥

श्वेताब्जपूर्णविमलासनसंस्थिते हे
    श्वेताम्बरावृतमनोहरमञ्जुगात्रे ।
उद्यन्मनोज्ञसितपङ्कजमञ्जुलास्ये
    विद्याप्रदायिनि सरस्वति नौमि नित्यम् ॥८॥

मातस्त्वदीयपदपङ्कजभक्तियुक्ता
    ये त्वां भजन्ति निखिलानपरान्विहाय ।
ते निर्जरत्वमिह यान्ति कलेवरेण
    भूवह्निवायुगगनाम्बुविनिर्मितेन ॥९॥

मोहान्धकारभरिते हृदये मदीये
    मातः सदैव कुरु वासमुदारभावे ।
स्वीयाखिलावयवनिर्मलसुप्रभाभिः
    शीघ्रं विनाशय मनोगतमन्धकारम् ॥१०॥

ब्रह्मा जगत् सृजति पालयतीन्दिरेशः
    शम्भुर्विनाशयति देवि तव प्रभावैः ।
न स्यात्कृपा यदि तव प्रकटप्रभावे
    न स्युः कथञ्चिदपि ते निजकार्यदक्षाः ॥११॥

लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः ।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ।।१२।।

सरस्वत्यै नमो नित्यं भद्रकाल्यै नमो नमः ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ।।१३।।

सरस्वति महाभागे विद्ये कमललोचने ।
विद्यारूपे विशालाक्षि विद्यां देहि नमोऽस्तु ते ।।१४।।

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ।।१५।।

।। इति श्रीसरस्वतीस्तोत्रं सम्पूर्णम् ।।

* * *

## 103. संकटनाशन गणेश स्तोत्रम्

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यमायुः कामार्थसिद्धये ।।
प्रथमं वक्रतुण्डं च एकदन्तं द्विवतीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ।।

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टमम् ।।
नवमं भालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ।।

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ।।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् ।।

जपेद् गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ।।
अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत् सर्वा गणेशस्य प्रसादतः ।।

।। इतिश्रीनारदपुराणे संकटनाशन गणेशस्तोत्रं सम्पूर्णम् ।।

# कलश का महत्व

अगले खण्ड 7 विविधा में ''कलश पूजा'' को सर्व प्रथम रखा गया है। वस्तुतः कलश में त्रिदेव अर्थात् ब्रह्मा, विष्णु, महेश निवास करते हैं। यह समस्त सागर, समस्त द्वीप, समस्त पृथ्वी का प्रतीक होता है। कलश में चारों वेद, समस्त नदियाँ समाहित हैं। इसलिए हमने आराधना के मुख पृष्ठ के लिए कलश को चुना है।

* * *

# खण्ड 7 - प्रकीर्णम्
# विविधा

# 104. कलशपूजा

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणास्मृताः ।।

कुक्षौ तु सागरास्सर्वे सप्त द्वीपा वसुन्धरा ।
ऋग्वेदोऽपि यजुर्वेदः सामवेदोऽथर्वणः ।।

अंगैश्चसहिता सर्वे कलशं तु समाश्रिताः ।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।।

अयान्तु देवपूजार्थं दुरितक्षयकारकाः ।
सर्वे समुद्राः सरिताः तीर्थानी जलदानदाः ।।

गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं-कुरु ।।

गङ्गादि सर्वतीर्थेभ्यो नमः कलशपूजां समर्पयामिः ।।

* * *

# 105. स्मरण

## पंचमातु स्मरण

गायत्रीं तुलसीं गंगां कामधेनुं अरुन्धतीं ।
पंच मातुः स्मरेन्नित्यम् महापातक नाशनम् ।।

## गुरु स्मरण

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुसाक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः ।।

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणम् त्वमेव त्वमेव सर्वं मम देव देव ।।

## पतिव्रता स्मरण

अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।
पंचकन्याः स्मरेन्नित्यं महापातकनाशनम् ।।

## चिरंजीवी स्मरण

अश्वत्थामा बलिर्व्यासो हनूमांश्चविभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ।।

## गोमाता स्मरण

गावो समाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम्

* * *

# 106. गायत्री मन्त्र एवं नवग्रहमन्त्र

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्य
धीमहि धियो यो नः प्रचोदयात् ।।

## नवग्रह मन्त्र

१. सूर्य ॐ ह्राँ ह्रीं ह्रौं सः सूर्याय नमः

२. चन्द्र ॐ श्राँ श्रीं श्रौं सः चन्द्रमसे नमः

३. मंगलॐ क्राँ क्रीं क्रौं सः भौमाये नमः

४. बुध ॐ ब्राँ ब्रीं ब्रौं सः बुधाये नमः

५. गुरु ॐ ग्राँ ग्रीं ग्रौं सः गुरवे नमः

६. शुक्र ॐ द्राँ द्रीं द्रौं सः शुक्राये नमः

७. शनि ॐ प्राँ प्रीं प्रौं सः शनये नमः

८. राहु ॐ भ्राँ भ्रीं भ्रौं सः राहवे नमः

९. केतु ॐ स्त्रां स्त्रीं स्त्रौं सः केतवे नमः

नमः सूर्याय सोमाय मंगलाय बुधाय च ।
गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः ।।

* * *

# 107. सर्वहित कामना एवं शांति मन्त्र

स्वस्ति प्रजाभ्य परिपालयन्तां न्यायेन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोका समस्ताः सुखिनो भवन्तु ।।

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
दशो यं क्षोभरहितः सजन्नासन्तु निर्भयाः ।।

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः ।
अधनाः सधनाः सन्तु जीवन्तु शरदः शतम् ।।

सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत् ।।

ॐ सर्वेषां स्वस्तिर्भवतु । सर्वेषां शान्तिर्भवतु ।
सर्वेषां पूर्णं भवतु । सर्वेषां मंगलं भवतु ।

## शांतिमन्त्र

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै
।। ॐ शान्तिः शान्तिः शान्तिः ।।

ॐ असतो मा सद्गमय तमसो मा ज्योतिर्गमय ।
मृत्योर्मा अमृतं गमय ॐ शान्तिः शान्तिः शान्तिः ।।

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिश्यते ।।

* * *

# 108. भव्य भारत भारती

जय-जय मधुर मंगलमय माता
पूजित पुण्य पुष्पाञ्जलि पवित्र
कर कमल युगल विमल अर्चित
सुख समृद्धि सम्पदा पूर्ण धन धान्य
प्रखर प्रतिभा प्रभा सम्पन्न देव भूमि
नयन निर्निमेष निहारि नत मस्तक नमामि ।। १ ।।

साहित्य-संगीत-रस सार सरसित
सकल विमल मन पूजित
सभ्यता संस्कृति साम्य सहित
जटिल कुटिल कपट छल रहित
प्रखर प्रतिभा प्रभा सम्पन्न देव भूमि
नयन निर्निमेष निहारि नत मस्तक नमामि ।। २ ।।

चण्ड प्रचण्ड अखण्ड कीर्ति युक्त
भारत भूमि भव्य, भय भाव मुक्त
अमित अमृतयम मुदित विदित सितकर
नव संतति सतत लसित हंसित हिमकर
प्रखर प्रतिभा प्रभा सम्पन्न देव भूमि
नयन निर्निमेष निहारि नत मस्तक नमामि ।। ३ ।।

भव्य भारत भारती भव वैभव मय
दिग दिगन्त व्याप्त-दिव्य ख्यातिमय
यत्र तत्र सर्वत्र सर्व मानव मात्र
बन्धु बान्धव गण भ्रातृ सम अवजानामि
प्रखर प्रतिभा प्रभा सम्पन्न देव भूमि
नयन निर्निमेष निहारि नत मस्तक नमामि ॥ ४ ॥

भव्य भारत भारती भावमय
निहारि-निहारि नत मस्तक नमामि
प्रखर प्रतिभा प्रभा सम्पन्न देव भूमि
नयन निर्निमेष निहारि नत मस्तक नमामि ॥ ५ ॥

इति श्री जयबाल संकलित आराधना संग्रह सम्पूर्णम् ॥

* * *

# भारतीय काल गणना

**1.** अयन - **6** माह

उत्तरायणम् - मकर संक्रांति से कर्क संक्रांति तक छह माह

दक्षिणायनम् - कर्क संक्रांति से मकर संक्रांति तक छह माह

**2.** ऋतु - **2** माह

| | | |
|---|---|---|
| वसन्त ऋतु | - | चैत्र एवं वैशाख |
| ग्रीष्म ऋतु | - | ज्येष्ठ एवं आषाढ |
| वर्षा ऋतु | - | श्रावण एवं भाद्रपद |
| शरद् ऋतु | - | अश्विन एवं कार्तिक |
| हेमन्त ऋतु | - | मार्गशीर्ष एवं पौष |
| शिशिर ऋतु | - | माघ एवं फाल्गुन |

**3.** माह - **30/31** दिन

ग. चंद्र माह

| | | | |
|---|---|---|---|
| **1.** चैत्र | **2.** वैशाख | **3.** ज्येष्ठ | **4.** आषाढ |
| **5.** श्रावण | **6.** भाद्रपद | **7.** अश्विन | **8.** कार्तिक |
| **9.** मार्गशीर्ष | **10.** पौष | **11.** माघ | **12.** फाल्गुन |

ख. सौर माह

| | | | |
|---|---|---|---|
| **1.** मेष | **2.** वृषभ | **3.** मिथुन | **4.** कर्क |
| **5.** सिंह | **6.** कन्या | **7.** तुला | **8.** वृश्चिक |
| **9.** धनु | **10.** मकर | **11.**कुम्भ | **12.** मीन |

4. पक्ष - 15 दिन

1. प्रतिपदा 2. द्वितीया 3. तृतीया 4. चतुर्थी
5. पञ्चमी 6. षष्ठी 7. सप्तमी 8. अष्टमी
9. नवमी 10. दशमी 11. एकादशी 12. द्वादशी
13. त्रयोदशी 14. चतुर्दशी 15. पूर्णिमा ( शुक्लपक्ष) / अमावस्या (कृष्णपक्ष)

5. नक्षत्र - घंटे एवं मिनट के हिसाब से

1. अश्विनी 2. भरणी 3. कृत्तिका
4. रोहिणी 5. मृगशिरा 6. आर्द्रा
7. पुनर्वसु 8. पुष्य 9. आश्लेषा
10. मघा 11. पूर्वाफाल्गुनी 12. उत्तराफाल्गुनी
13. हस्त 14. चित्रा 15. स्वाति
16. विशाखा 17. अनुराधा 18. ज्येष्ठा
19. मूला 20. पूर्वाषाढ 21. उत्तराषाढ
22. श्रवण 23. धनिष्ठा 24. शतभिषा
25. पूर्वाभाद्रपद 26. उत्तराभाद्रपद 27. रेवती